# Kartaviryakavachakathanam

# કાર્તવીર્યકવચકથનમ્

## Document Information

Text title : Kartaviryakavachakathanam

File name : kArtavIryakavachakathanam.itx

Category : deities_misc, bRRihannAradIyapurANa, kavacha

Location : doc_deities_misc

Proofread by : PSA Easwaran

Description/comments : bRRihannAradIyapurANa | pUrvabhAga | adhyAya 77/4-13 77/15-137||

Latest update : October 22, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

August 24, 2025

*sanskritdocuments.org*

# કાર્તવીર્યકવચકથનમ્

નારદ ઉવાચ ।
સાધુ સાધુ મહાપ્રાજ્ઞ સર્વ તન્ત્રવિશારદ ।
ત્વયા મહ્યં સમાખ્યાતં વિધાનં તન્ત્રગોપિતમ્ ॥ ૧॥

અધુના તુ મહાભાગ કાર્તવીર્યહનૂમતોઃ ।
કવચે શ્રોતુમિચ્છામિ તદ્વદસ્વકૃપાનિધે ॥ ૨॥

સનત્કુમાર ઉવાચ ।
શ્ૃણુ વિપ્રેન્દ્ર વક્ષ્યામિ કવચં પરમાદ્ભુતમ્ ।
કાર્તવીર્યસ્ય યેનાસૌ પ્રસન્નઃ કાર્યસિદ્ધિકૃત્ ॥ ૩॥

સહસ્રાદિત્યસઙ્કાશે નાનારત્નસમુજ્જ્વલે ।
ભાસ્વદ્ધ્વજપતાકાઢ્યે તુરગાયુતભૂષિતે ॥ ૪॥

મહાસંવર્તકામ્ભોધિભીમરાવવિરાવિણિ ।
સમુદ્ધૃતમહાછત્રવિતાનિતવિયત્પથે ॥ ૫॥

મહારથવરે દીપ્તનાનાયુધવિરાજિતે ।
સુસ્થિતં વિપુલોદારં સહસ્રભુજમણ્ડિતમ્ ॥ ૬॥

વામૈરુદ્દણ્ડકોદણ્ડાન્દધાનમપરૈઃ શરાન્ ।
કિરીટહારમુકુટકેયૂરવલયાઙ્ગદૈઃ ॥ ૭॥

મુદ્રિકોદરબન્ધાદ્યૈર્મૌઞ્જીનૂપુરકાદિભિઃ ।
ભૂષિતં વિવિધાકલ્પૈર્ભાસ્વરૈઃ સુમહાધનૈઃ ॥ ૮॥

આબદ્ધકવચં વીરં સુપ્રસન્નાનનામ્બુજમ્ ।
ધનુર્જ્યાસિંહનાદેન કમ્પયન્તં જગત્ત્રયમ્ ॥ ૯॥

સર્વશત્રુક્ષયકરં સર્વવ્યાધિવિનાશનમ્ ।
સર્વસમ્પત્પ્રદાતારં વિજયશ્રીનિષેવિતમ્ ॥ ૧૦॥

સર્વસૌભાગ્યદં ભદ્રં ભક્તાભયવિધાયિનમ્ ।
દિવ્યમાલ્યાનુલેપાઢ્યં સર્વલક્ષણસંયુતમ્ ॥ ૧૧॥

રથનાગાશ્વપાદાતવૃન્દમધ્યગમીશ્વરમ્ ।
વરદં ચક્રવર્તીનં સર્વલોકૈકપાલકમ્ ॥ ૧૨॥

સમાનોદિતસાહસ્રદિવાકરસમદ્યુતિમ્ ।
મહાયોગભવૈશ્વર્યકીર્ત્યાક્રાન્તજગત્ત્રયમ્ ॥ ૧૩॥

શ્રીમચ્ચક્રં હરેરંશાદવતીર્ણં મહીતલે ।
સમ્યગાત્માદિભેદેન ધ્યાત્વા રક્ષામુદીરયેત્ ॥ ૧૪॥

અસ્યાઙ્ગમૂર્તયઃ પઞ્ચ પાન્તુ માં સ્ફટિકોજ્જ્વલાઃ ।
અગ્નીશાસુરવાયવ્યકોણેષુ હૃદયાદિકાઃ ॥ ૧૫॥

સર્વતોઽસ્ત્રજ્વલદ્રૂપા દરચર્માસિપાણયઃ ।
અવ્યાહતબલૈશ્વર્યશક્તિસામર્થ્યવિગ્રહાઃ ॥ ૧૬॥

ક્ષેમઙ્કરીશક્તિયુતશ્ચૌરવર્ગવિભઞ્જનઃ ।
પ્રાચીં દિશં રક્ષતુ મે બાણબાણાસનાયુધઃ ॥ ૧૭॥

શ્રીકરીશક્તિસહિતો મારીભયવિનાશકઃ ।
શરચાપધરઃ શ્રીમાન્ દિશં મે પાતુ દક્ષિણામ્ ॥ ૧૮॥

મહાવશ્યકરીયુક્તઃ સર્વશત્રુવિનાશકૃત્ ।
મહેષુચાપધૃક્પાતુ મમ પ્રાચેતસીં દિશમ્ ॥ ૧૯॥

યશઃકર્યા સમાયુક્તો દૈત્યસઙ્ઘવિનાશનઃ ।
પરિરક્ષતુ મે સમ્યગ્વિદિશં ચૈત્રભાનવીમ્ ॥ ૨૦॥

વિદ્યાકરીસમાયુક્તઃ સુમહદ્દુઃખનાશનઃ ।
પાતુ મે નૈરૃતીં ચાપપાણિર્વિદિશમીશ્વરઃ ॥ ૨૧॥

ધનકર્યા સમાયુક્તો મહાદુરિતનાશનઃ ।
ઇષ્વાસનેષુધૃક્પાતુ વિદિશં મમ વાયવીમ્ ॥ ૨૨॥

આયુઃકર્યા યુતઃ શ્રીમાન્મહાભયવિનાશનઃ ।
ચાપેષુધારી શૈવીં મે વિદિશં પરિરક્ષતુ ॥ ૨૩॥

વિજયશ્રીયુતઃ સાક્ષાત્સહસ્રારધરો વિભુઃ ।
દિશમૂર્દ્ધ્વામવતુ મે સર્વદુષ્ટભયઙ્કરઃ ॥ ૨૪॥

શઙ્ખભૃત્સુમહાશક્તિસંયુતોઽપ્યધરાં દિશમ્ ।
પરિરક્ષતુ મે દુઃખધ્વાન્તસમ્ભેદભાસ્કરઃ ॥ ૨૫॥

મહાયોગસમાયુક્તઃ સર્વદિક્ચ્યક્રમણ્ડલઃ ।
મહાયોગીશ્વરઃ પાતુ સર્વતો મમ પદ્મભૃત્ ॥ ૨૬॥

એતાસ્તુ મૂર્તયો રક્તા રક્તમાલ્યાંશુકાવૃતાઃ ।
પ્રધાનદેવતારૂપાઃ પૃથગ્રથવરે સ્થિતાઃ ॥ ૨૭॥

શક્તયઃ પદ્મહસ્તાશ્ચ નીલેન્દીવરસન્નિભાઃ ।
શુક્લમાલ્યાનુવસનાઃ સુલિપ્તતિલકોજ્જ્વલાઃ ॥ ૨૮॥

તત્પાર્ષદેશ્વરાઃ સ્વસ્વવાહનાયુધભૂષણાઃ ।
સ્વસ્વદિક્ષુ સ્થિતાઃ પાન્તુ મામિન્દ્રાદ્યા મહાબલાઃ ॥ ૨૯॥

એતાસ્તસ્ય સમાખ્યાતાઃ સર્વાવરણદેવતાઃ ।
સર્વતો માં સદા પાન્તુ સર્વશક્તિસમન્વિતાઃ ॥ ૩૦॥

હૃદયે ચોદરે નાભૌ જઠરે ગુહ્યમણ્ડલે ।
તેજોરૂપાઃ સ્થિતાઃ પાન્તુ વાઞ્છાસુખવનદ્રુમાઃ ॥ ૩૧॥

દિશં ચાન્યે મહાવર્ણા મન્ત્રરૂપા મહોજ્જ્વલાઃ ।
વ્યાપકત્વેન પાન્ત્વસ્માનાપાદતલમસ્તકમ્ ॥ ૩૨॥

કાર્તવીર્યઃ શિરઃ પાતુ લલાટં હૈહયેશ્વરઃ ।
સુમુખો મે મુખં પાતુ કર્ણૌ વ્યાપ્તજગત્ત્રયઃ ॥ ૩૩॥

સુકુમારો હનું પાતુ ભ્રૂયુગં મે ધનુર્ધરઃ ।
નયનં પુણ્ડરીકાક્ષો નાસિકાં મે ગુણાકરઃ ॥ ૩૪॥

અધરોષ્ઠૌ સદા પાતુ બ્રહ્મણ્યો દ્વિજાન્કવિઃ ।
સર્વશાસ્ત્રકલાધારી જિહ્વાં ચિબુકમવ્યયઃ ॥ ૩૫॥

દત્તાત્રેયપ્રિયઃ કણ્ઠં સ્કન્ધૌ રાજકુલેશ્વરઃ ।
ભુજૌ દશાસ્યદર્પઘ્નો હૃદયં મે મહાબલઃ ॥ ૩૬॥

કુક્ષિં રક્ષતુ મે વિદ્વાન્ વક્ષઃ પરપુરઞ્જયઃ ।
કરૌ સર્વાર્થદઃ પાતુ કરાગ્રાણિ જગત્પ્રિયઃ ॥ ૩૭॥

રેવામ્બુલીલાસન્દૃપ્તો જઠરં પરિરક્ષતુ ।

વીરશૂરસ્તુ મે નાભિં પાર્શ્વૌ મે સર્વદુષ્ટહા ॥ ૩૮॥

સહસ્રભુજભૃત્પૃષ્ટં સપ્તદ્વીપાધિપઃ કટિમ્ ।
ઊરૂ માહિષ્મતીનાથો જાનુની વલ્લભો ભુવઃ ॥ ૩૯॥

જઙ્ઘે વીરાધિપઃ પાતુ પાતુ પાદૌ મનોજવઃ ।
પાતુ સર્વાયુધધરઃ સર્વાઙ્ગં સર્વમર્મસુ ॥ ૪૦॥

સર્વદુષ્ટાન્તકઃ પાતુ ધાત્વષ્ટકકલેવરમ્ ।
પ્રાણાદિદશજીવેશાન્સર્વશિષ્ટેષ્ટદોઽવતુ ॥ ૪૧॥

વશીકૃતેન્દ્રિયગ્રામઃ પાતુ સર્વેન્દ્રિયાણિ મે ।
અનુક્તમપિ યત્સ્થાનં શરીરાન્તર્બહિશ્ચ યત્ ॥ ૪૨॥

તત્સર્વં પાતુ મે સર્વલોકનાથેશ્વરેશ્વરઃ ।
વજ્રાત્સારતરં ચેદં શરીરં કવચાવૃતમ્ ॥ ૪૩॥

બાધાશતવિનિર્મુક્તમસ્તુ મે ભયવર્જિતમ્ ।
બદ્ધ્વેદં કવચં દિવ્યમભેદ્યં હૈહયેશિતુઃ ॥ ૪૪॥

વિચરામિ દિવા રાત્રૌ નિર્ભયેનાન્તરાત્મના ।
રાજમાર્ગે મહાદુર્ગે માર્ગે ચૌરાદિસઙ્કુલે ॥ ૪૫॥

વિષમે વિપિને ઘોરે દાવાગ્નૌ ગિરિકન્દરે ।
સઙ્ગ્રામે શસ્ત્રસઙ્ઘાતે સિંહવ્યાઘ્રનિષેવિતે ॥ ૪૬॥

ગહ્વરે સર્વસઙ્કીર્ણે સન્ધ્યાકાલે નૃપાલયે ।
વિવાદે વિપુલાવર્તે સમુદ્રે ચ નદીતટે ॥ ૪૭॥

પરિપન્થિજનાકીર્ણે દેશે દસ્યુગણાવૃતે ।
સર્વસ્વહરણે પ્રાપ્તે પ્રાપ્તે પ્રાણસ્ય સઙ્કટે ॥ ૪૮॥

નાનારોગજ્વરાવેશે પિશાચપ્રેતયાતને ।
મારીદુઃસ્વપ્નપીડાસુ ક્લિષ્ટે વિશ્વાસઘાતકે ॥ ૪૯॥

શારીરે ચ મહાદુઃખે માનસે ચ મહાજ્વરે ।
આધિવ્યાધિભયે વિઘ્નજ્વાલોપદ્રવકેઽપિ ચ ॥ ૫૦॥

ન ભવતુ ભયં કિઞ્ચિત્કવચેનાવૃતસ્ય મે ।
આગુન્તુકામાનખિલાનસ્મદ્વસુવિલુમ્પકાન્ ॥ ૫૧॥

નિવારયતુ દોર્દણ્ડસહસ્રેણ મહારથઃ ।
સ્વકરોદ્ધૃતસાહસ્રપાશબદ્ધાન્સુદુર્જયાન્ ॥ ૫૨॥

સંરુદ્ધગતિસામર્થ્યાન્કરોતુ કૃતવીર્યજઃ ।
સૃણિસાહસ્રનિર્ભિન્નાન્સહસ્રશરખણ્ડિતાન્ ॥ ૫૩॥

રાજચૂડામણિઃ ક્ષિપ્રં કરોત્વસ્મદ્વિરોધકાન્ ।
ખડ્ગસાહસ્રદલિતાન્સહસ્રમુસલાર્દિતાન્ ॥ ૫૪॥

ચૌરાદિદુષ્ટસત્ત્વૌઘાન્કરોતુ કમલેક્ષણઃ ।
સ્વશઙ્ખનાદસન્ત્રસ્તાન્સહસ્રારસહસ્રભૃત્ ॥ ૫૫॥

અવતારો હરેઃ સાક્ષાત્પાલયત્વખિલં મમ ।
કાર્તવીર્ય મહાવીર્ય સર્વદુષ્ટવિનાશન ॥ ૫૬॥

સર્વત્ર સર્વદા દુષ્ટચૌરાન્નાશાય નાશય ।
કિં ત્વં સ્વપિષિ દુષ્ટઘ્ન કિં તિષ્ટસિ ચિરાયસિ ॥ ૫૭॥

ઉત્તિષ્ઠ પાહિ નઃ સર્વભયેભ્યઃ સ્વસુતાનિવ ।
યે ચૌરા વસુહર્તારો વિદ્વિષો યે ચ હિંસકાઃ ॥ ૫૮॥

સાધુભીતિકરા દુષ્ટાશ્છદ્મકા યે દુરાશયાઃ ।
દુર્હૃદો દુષ્ટભૂપાલા દુષ્ટામાત્યાશ્ચ પાપકાઃ ॥ ૫૯॥

યે ચ કાર્યવિલોપ્તારો યે ખલાઃ પરિપન્થિનઃ ।
સર્વસ્વહારિણાં યે ચ પઞ્ચ માયાવિનોઽપરે ॥ ૬૦॥

મહાક્લેશકરા મ્લેચ્છા દસ્યવો વૃષલાશ્ચ યે ।
યેઽગ્નિદા ગરદાતારો વઞ્ચકાઃ શસ્ત્રપાણયઃ ॥ ૬૧॥

યે પાપા દુષ્ટકર્માણો દુઃખદા દુષ્ટબુદ્ધયઃ ।
વ્યાજકાઃ કુપથાસક્તા યે ચ નાનાભયપ્રદાઃ ॥ ૬૨॥

છિદ્રાન્વેષરતા નિત્યં યેઽસ્માન્બાધિતુમુદ્યતાઃ ।
તે સર્વે કાર્તવીર્યસ્ય મહાશઙ્ખરવાહતાઃ ॥ ૬૩॥

સહસા વિલયં યાન્તુ દૂરાદિવ વિમોહિતાઃ ।
યે દાનવા મહાદૈત્યા યે યક્ષા યે ચ રાક્ષસાઃ ॥ ૬૪॥

પિશાચા યે મહાસત્ત્વા યે ભૂતબ્રહ્મરાક્ષસાઃ ।
અપસ્મારગ્રહા યે ચ યે ગ્રહાઃ પિશિતાશનાઃ ॥ ૬૫॥

મહાલોહિતભોક્તારો વેતાલા યે ચ ગુહ્યકાઃ ।
ગન્ધર્વાપ્સરસઃ સિદ્ધા યે ચ દેવાદિયોનયઃ ॥ ૬૬॥

ડાકિન્યો દ્રુણસાઃ પ્રેતાઃ ક્ષેત્રપાલા વિનાયકાઃ ।
મહાવ્યાઘ્રમહામેઘા મહાતુરગરૂપકાઃ ॥ ૬૭॥

મહાગજા મહાસિંહા મહામહિષયોનયઃ ।
ઋક્ષવારાહશુનકવાનરોલૂકમૂર્તયઃ ॥ ૬૮॥

મહોષ્ટ્રખરમાર્જારસર્પગોવૃષમસ્તકાઃ ।
નાનારૂપા મહાસત્ત્વા નાનાક્લેશસહસ્રદાઃ ॥ ૬૯॥

નાનારોગકરાઃ ક્ષુદ્રા મહાવીર્યા મહાબલાઃ ।
વાતિકાઃ પૈત્તિકા ઘોરા શ્લૈષ્મિકાઃ સાન્નિપાતિકાઃ ॥ ૭૦॥

માહેશ્વરા વૈષ્ણવાશ્ચ વૈરિઞ્ચ્યાશ્ચ મહાગ્રહાઃ ।
સ્કાન્દા વૈનાયકાઃ ક્રૂરા યે ચ પ્રમથગુહ્યકાઃ ॥ ૭૧॥

મહાશત્રુગ્રહા રૌદ્રા મહામારીમસૂરિકાઃ ।
ઐકાહિકા વ્યાહિકાશ્ચ ત્ર્યાહિકાશ્ચ મહાજ્વરાઃ ॥ ૭૨॥

ચાતુર્થિકાઃ પાક્ષિકાશ્ચ માસ્યાઃ ષાણ્માસિકાશ્ચ યે ।
સાંવત્સરા દુર્નિવાર્યા જ્વરાઃ પરમદારુણાઃ ॥ ૭૩॥

સ્વાપ્નિકા યે મહોત્પાતા યે ચ દુઃસ્વાપ્નિકા ગ્રહાઃ ।
કૂષ્માણ્ડા જૃમ્ભિકા ભૌમા દ્રોણાઃ સાન્નિધ્યવઞ્ચકાઃ ॥ ૭૪॥

ભ્રમિકાઃ પ્રાણહર્તારો યે ચ બાલગ્રહાદયઃ ।
મનોબુદ્ધીન્દ્રિયહરાઃ સ્ફોટકાશ્ચ મહાગ્રહાઃ ॥ ૭૫॥

મહાશના બલિભુજો મહાકુણપભોજનાઃ ।
દિવાચરા રાત્રિચરા યે ચ સન્ધ્યાસુ દારુણાઃ ॥ ૭૬॥

પ્રમત્તા વાઽપ્રમત્તા વૈ યે માં બાધિતુમુદ્યતાઃ ।
તે સર્વે કાર્ત્તવીર્યસ્ય ધનુર્મુક્તશરાહતાઃ ॥ ૭૭॥

સહસ્રધા પ્રણશ્યન્તુ ભગ્નસત્ત્વબલોદ્યમાઃ ।
યે સર્પા યે મહાનાગા મહાગિરિબિલેશયાઃ ॥ ૭૮॥

કાલવ્યાલા મહાદંષ્ટ્રા મહાજગરસંજ્ઞકાઃ ।

અનન્તશૂલિકાદ્યાશ્ચ દંષ્ટ્રાવિષમહાભયાઃ ॥ ૭૯॥

અનેકશતશીર્ષાશ્ચ ખણ્ડપુચ્છાશ્ચ દારુણાઃ ।
મહાવિષજલૌકાશ્ચ વૃશ્ચિકા રુક્તપુચ્છકાઃ ॥ ૮૦॥

આશીવિષાઃ કાલકૂટા મહાહાલાહલાહ્વયાઃ ।
જલસર્પા જલવ્યાલા જલગ્રાહાશ્ચ કચ્છપાઃ ॥ ૮૧॥

મત્સ્યકા વિષપુચ્છાશ્ચ યે ચાન્યે જલવાસિનઃ ।
જલજાઃ સ્થલજાશ્ચૈવ કૃત્રિમાશ્ચ મહાવિષાઃ ॥ ૮૨॥

ગુપ્તરૂપા ગુપ્તવિષા મૂષિકા ગૃહગોધિકાઃ ।
નાનાવિષાશ્ચ યે ઘોરા મહોપવિષસંજ્ઞકાઃ ॥ ૮૩॥

યેઽસ્માન્બાધિતુમિચ્છન્તિ શરીરપ્રાણનાશકાઃ ।
તે સર્વે કાર્તવીર્યસ્ય ખડ્ગસાહસ્રદારિતાઃ ॥ ૮૪॥

દૂરાદેવ વિનશ્યન્તુ પ્રણષ્ટેન્દ્રિયસાહસાઃ ।
મનુષ્યાઃ પશવો ત્વૃક્ષવાનરા વનગોચરાઃ ॥ ૮૫॥

સિંહવ્યાઘ્રવરાહાશ્ચ મહિષા યે મહામૃગાઃ ।
ગજાસ્તુરઙ્ગા ગવયા રાસભાઃ શરભા વૃકાઃ ॥ ૮૬॥

શુનકા દ્વીપિનઃ શુભ્રા માર્જારા બિલલોલુપાઃ ।
શ◌ૃગાલાઃ શશકાઃ શ્યેના ગરુત્મન્તો વિહઙ્ગમાઃ ॥ ૮૭॥

ભેરુણ્ડા વાયસા ગૃધ્રા હંસાદ્યાઃ પક્ષિજાતયઃ ।
ઉદ્ભિજ્જાશ્ચાણ્ડજાશ્ચૈવ સ્વેદજાશ્ચ જરાયુજાઃ ॥ ૮૮॥

નાનાભેદકુલે જાતા નાનાભેદાઃ પૃથગ્વિધાઃ ।
યેઽસ્માન્બાધિતુમિચ્છન્તિ સન્ધ્યાસુ ચ દિવા નિશિ ॥ ૮૯॥

તે સર્વે કાર્તવીર્યસ્ય ગદાસાહસ્રદારિતાઃ ।
દૂરાદેવ વિનશ્યન્તુ વિનષ્ટગતિપૌરુષાઃ ॥ ૯૦॥

યે ચાક્ષેમપ્રદાતારઃ કૂટમાયાવિનશ્ચ યે ।
મારણોત્સાદનોન્મૂલદ્વેષમોહનકારકાઃ ॥ ૯૧॥

વિશ્વાસઘાતકા દુષ્ટા યે ચ સ્વામિદ્રુહો નરાઃ ।
યે ચાતતાયિનો દુષ્ટા યે પાપા ગોપ્યહારિણઃ ॥ ૯૨॥

દાહોપઘાતગરલશસ્ત્રપાતાતિદુઃખદાઃ ।
ક્ષેત્રવિત્તાદિહરણબન્ધનાદિભયપ્રદાઃ ॥ ૯૩॥

ઈતયો વિવિધાકારો યે ચાન્યે દુષ્ટજાતયઃ ।
પીડાકરા યે સતતં છિદ્રમિચ્છન્તિ બાધિતુમ્ ॥ ૯૪॥

તે સર્વે કાર્તવીર્યસ્ય ચક્રસાહસ્રદારિતાઃ ।
દૂરાદેવ ક્ષયં યાન્તુ વિનષ્ટબલસાહસાઃ ॥ ૯૫॥

યે મેઘા યે મહાવર્ષા યે વાતા યાશ્ચ વિદ્યુતઃ ।
યે મહાશનયો દીપ્તા યે નિર્ઘાતાશ્ચ દારુણાઃ ॥ ૯૬॥

ઉલ્કાપાતાશ્ચ યે ઘોરા યે મહેન્દ્રાયુધાદયઃ ।
સૂર્યેન્દુકુજસૌમ્યાશ્ચ ગુરુકાવ્યશનૈશ્ચરાઃ ॥ ૯૭॥

રાહુશ્ચ કેતવો ઘોરા નક્ષત્રા રાશયસ્તથા ।
તિથયઃ સઙ્ક્રમા માસા હાયના યુગનાયકાઃ ॥ ૯૮॥

મન્વન્તરાધિપાઃ સિદ્ધા ઋષયો યોગસિદ્ધયઃ ।
નિધયો ઋગ્યજુઃસામાથર્વણાશ્ચૈવ વહ્નયઃ ॥ ૯૯॥

ઋતવો લોકપાલાશ્ચ પિતરો દેવસંહતિઃ ।
વિદ્યાશ્ચૈવ ચતુઃષષ્ટિભેદા યા ભુવનત્રયે ॥ ૧૦૦॥

યે ત્વત્ર કીર્તિતાઃ સર્વે યે ચાન્યે નાનુકીર્તિતાઃ ।
તે સન્તુ નઃ સદા સૌમ્યાઃ સર્વકાલસુખાવહાઃ ॥ ૧૦૧॥

આજ્ઞયા કાર્તવીર્યસ્ય યોગીન્દ્રસ્યામિતદ્યુતેઃ ।
કાર્તવીર્યાર્જુનો ધન્વી રાજેન્દ્રો હૈહયેશ્વરઃ ॥ ૧૦૨॥

દશાસ્યદર્પહા રેવાલીલાદૃપ્તઃ સુદુર્જયઃ ।
દુઃખહા ચૌરદમનો રાજરાજેશ્વરઃ પ્રભુઃ ॥ ૧૦૩॥

સર્વજ્ઞઃ સર્વદઃ શ્રીમાન્ સર્વશિષ્ટેષ્ટદઃ કૃતી ।
રાજચૂડામણિર્યોગી સપ્તદ્વીપાધિનાયકઃ ॥ ૧૦૪॥

વિજયી વિશ્વજિદ્વાગ્મી મહાગતિરલોલુપઃ ।
યજ્વા વિપ્રપ્રિયો વિદ્વાન્ બ્રહ્મજ્ઞેયઃ સનાતનઃ ॥ ૧૦૫॥

માહિષ્મતીપતિર્યોધા મહાકીર્તિર્મહાભુજઃ ।
સુકુમારો મહાવીરો મારીઘ્નો મદિરેક્ષણઃ ॥ ૧૦૬॥

શત્રુઘ્નઃ શાશ્વતઃ શૂરઃ શઙ્ખભૃદ્યોગિવલ્લભઃ ।
મહાભાગવતો ધીમાન્મહાભયવિનાશનઃ ॥ ૧૦૭॥

અસાધ્યી વિગ્રહો દિવ્યો ભાવો વ્યાપ્તજગત્રયઃ ।
જિતેન્દ્રિયો જિતારાતિઃ સ્વચ્છન્દોઽનન્તવિક્રમઃ ॥ ૧૦૮॥

ચક્રભૃત્પરચક્રઘ્નઃ સઙ્ગ્રામવિધિપૂજિતઃ ।
સર્વશાસ્ત્રકલાધારી વિરજા લોકવન્દિતઃ ॥ ૧૦૯॥

વીરો વિમલસત્ત્વાઢ્યો મહાબલપરાક્રમઃ ।
વિજયશ્રીમહામાન્યો જિતારિર્મન્ત્રનાયકઃ ॥ ૧૧૦॥

ખડ્ગભૃત્કામદઃ કાન્તઃ કાલઘ્નઃ કમલેક્ષણઃ ।
ભદ્રવાદપ્રિયો વૈદ્યો વિબુધો વરદો વશી ॥ ૧૧૧॥

મહાધનો નિધિપતિર્મહાયોગી ગુરુપ્રિયઃ ।
યોગાઢ્યઃ સર્વરોગઘ્નો રાજિતાખિલભૂતલઃ ॥ ૧૧૨॥

દિવ્યાસ્ત્રભૃદમેયાત્મા સર્વગોપ્તા મહોજ્જ્વલઃ ।
સર્વાયુધધરોઽભીષ્ટપ્રદઃ પરપુરઞ્જયઃ ॥ ૧૧૩॥

યોગસિદ્ધો મહાકાયો મહાવૃન્દશતાધિપઃ ।
સર્વજ્ઞાનનિધિઃ સર્વસિદ્ધિદાનકૃતોદ્યમઃ ॥ ૧૧૪॥

ઇત્યષ્ટશતનામોક્ત્યા મૂર્તયો દશ દિક્પથિ ।
સમ્યગ્દશદિશો વ્યાપ્ય પાલયન્તુ ચ માં સદા ॥ ૧૧૫॥

સ્વસ્થાઃ સર્વેન્દ્રિયાઃ સન્તુ શાન્તિરસ્તુ સદા મમ ।
શેષાદ્યા મૂર્તયોઽષ્ટૌ ચ વિક્રમેણૈવ ભાસ્વરાઃ ॥ ૧૧૬॥

અગ્નિનિરૃતિવાય્વીશકોણગાઃ પાન્તુ માં સદા ।
મમ સૌખ્યમસમ્બાધમારોગ્યમપરાજયઃ ॥ ૧૧૭॥

દુઃખહાનિરવિઘ્નશ્ચ પ્રજાવૃદ્ધિઃ સુખોદયઃ ।
વાઞ્છાપ્તિરતિકલ્યાણમવૈષમ્યમનામયમ્ ॥ ૧૧૮॥

અનાલસ્યમભીષ્ટં સ્યાન્મૃત્યુહાનિર્બલોન્નતિઃ ।
ભયહાનિર્યશઃ કાન્તિર્વિદ્યા ઋદ્ધિર્મહાશ્રિયઃ ॥ ૧૧૯॥

અનષ્ટદ્રવ્યતા ચૈવ નષ્ટસ્ય પુનરાગમઃ ।

દીર્ઘાયુષ્યં મનોહર્ષઃ સૌકુમાર્યમભીપ્સિતમ્ ॥ ૧૨૦॥

અપ્રધૃષ્યતમત્વં ચ મહાસામર્થ્યમેવ ચ ।
સન્તુ મે કાર્તવીર્યસ્ય હૈહયેન્દ્રસ્ય કીર્તનાત્ ॥ ૧૨૧॥

ય ઇદં કાર્તવીર્યસ્ય કવચં પુણ્યવર્દ્ધનમ્ ।
સર્વપાપપ્રશમનં સર્વોપદ્રવનાશનમ્ ॥ ૧૨૨॥

સર્વશાન્તિકરં ગુહ્યં સમસ્તભયનાશનમ્ ।
વિજયાર્થપ્રદં નૃણાં સર્વસમ્પત્પ્રદં શુભમ્ ॥ ૧૨૩॥

શ ૃણુયાદ્વા પઠેદ્વાપિ સર્વકામાનવાપ્નુયાત્ ।
ચૌરૈર્હૃતં યદા પશ્યેત્પશ્ચાદિધનમાત્મનઃ ॥ ૧૨૪॥

સપ્તવારં તદા જપ્યેન્નિશિ પશ્ચિમદિઙ્મુખઃ ।
સપ્તરાત્રેણ લભતે નષ્ટદ્રવ્યં ન સંશયઃ ॥ ૧૨૫॥

સપ્તવિંશતિધા જપ્ત્વા પ્રાચીદિગ્વદનઃ પુમાન્ ।
દેવાસુરનિભં ચાપિ પરચક્રં નિવારયેત્ ॥ ૧૨૬॥

વિવાદે કલહે ઘોરે પઞ્ચધા યઃ પઠેદિદમ્ ।
વિજયો જાયતે તસ્ય ન કદાચિત્પરાજયઃ ॥ ૧૨૭॥

સર્વરોગપ્રપીડાસુ ત્રેધા વા પઞ્ચધા પઠેત્ ।
સ રોગમૃત્યુવેતાલભૂતપ્રેતૈર્ન બાધ્યતે ॥ ૧૨૮॥

સમ્યગ્દ્વાદશધા રાત્રૌ પ્રજપેદ્બન્ધમુક્તયે ।
ત્રિદિનાન્નિગડાદ્બદ્ધો મુચ્યતે નાત્ર સંશયઃ ॥ ૧૨૯॥

અનેનૈવ વિધાનેન સર્વસાધનકર્મણિ ।
અસાધ્યમપિ સપ્તાહાત્સાધયેન્મન્ત્રવિત્તમઃ ॥ ૧૩૦॥

યાત્રાકાલે પઠિત્વેદં માર્ગે ગચ્છતિ યઃ પુમાન્ ।
ન દુષ્ટચૌરવ્યાઘ્રાદ્યૈર્ભયં સ્યાત્પરિપન્થિભિઃ ॥ ૧૩૧॥

જપન્નાસેચનં કુર્વઞ્જલેનાઞ્જલિના તનૌ ।
ન ચાસૌ વિષકૃત્યાદિરોગસ્ફોટૈઃ પ્રબાધ્યતે ॥ ૧૩૨॥

કાર્તવીર્યઃ ખલદ્વેષી કૃતવીર્યસુતો બલી ।
સહસ્રબાહુઃ શત્રુઘ્નો રક્તવાસા ધનુર્ધરઃ ॥ ૧૩૩॥

રક્તગન્ધો રક્તમાલ્યો રાજા સ્મર્તુરભીષ્ટદઃ ।
દ્વાદશૈતાનિ નામાનિ કાર્તવીર્યસ્ય યઃ પઠેત્ ॥ ૧૩૪॥

સમ્પદસ્તસ્ય જાયન્તે જનાસ્તસ્ય વશે સદા ।
યઃ સેવતે સદા વિપ્ર શ્રીમચ્ચક્રાવતારકમ્ ॥ ૧૩૫॥

તસ્ય રક્ષાં સદા કુર્યાચ્ચક્રં વિષ્ણોર્મહાત્મનઃ ।
મયૈતત્કવચં વિપ્ર દત્તાત્રેયાન્મુનીશ્વરાત્ ॥ ૧૩૬॥

શ્રુતં તુભ્યં નિગદિતં ધારયસ્વાખિલેષ્ટદમ્ ॥ ૧૩૭॥

ઇતિ શ્રીબૃહન્નારદીયપુરાણે પૂર્વભાગે બૃહદુપાખ્યાને તૃતીયપાદે
કાર્તવીર્યકવચકથનં નામ સપ્તસપ્તતિતોમોઽધ્યાયઃ ॥ ૭૭॥

બૃહન્નારદીયપુરાણ । પૂર્વભાગ । અધ્યાય ૭૭/૪-૧૩ ૭૭/૧૫-૧૩૭॥

bRRihannAradIyapurANa . pUrvabhAga . adhyAya 77/4-13 77/15-137..

Proofread by PSA Easwaran

*Kartaviryakavachakathanam*

pdf was typeset on August 24, 2025

Please send corrections to *sanskrit@cheerful.com*